# सुन्दरकाण्ड सप्तत्रिंशः सर्गः (३७) - विश्वरूप दर्शनम्

सीता तद्वचनं श्रुत्वा पूर्णचन्द्र निभानना ।
हनूमन्त मुवाचेदं धर्मार्थ सहितं वचः ॥ १ ॥

अमृतं विषसंसृष्टं त्वया वानर भाषितम् ।
यच्च नान्यमना रामो यच्च शोक परायणः ॥ २ ॥

ऐश्वर्ये वा सुविस्तीर्णे व्यसने वा सुदारुणे ।
रज्ज्वेव पुरुषं बद्ध्वा कृतान्तः परिकर्षति ॥ ३ ॥

विधिर्नूनमसंहार्यः प्राणिनां प्लवगोत्तम ।
सौमित्रिं मां च रामं च व्यसनैः पश्य मोहितान् ॥ ४ ॥

शोकस्यास्य कदा पारं राघवोऽधिगमिष्यति ।
प्लवमानः परिश्रान्तो हतनौः सागरे यथा ॥ ५ ॥

राक्षसानां वधं कृत्वा सूदयित्वा च रावणम् ।
लङ्का मुन्मूलितां कृत्वा कदा द्रक्ष्यति मां पतिः ॥ ६ ॥

स वाच्यः सन्त्वरस्वेति यावदेव न पूर्यते ।
अयं संवत्सरः कालस् तावद्धि मम जीवितम् ॥ ७ ॥

वर्तते दशमो मासो द्वौ तु शेषौ प्लवङ्गम ।
रावणेन नृशंसेन समयो यः कृतो मम ॥ ८ ॥

विभीषणेन च भ्रात्रा मम निर्यातनं प्रति ।
अनुनीतः प्रयत्नेन न च तत्कुरुते मतिम् ॥ ९ ॥

मम प्रति प्रदानं हि रावणस्य न रोचते ।
रावणं मार्गते सङ्ख्ये मृत्युः कालवशं गतम् ॥ १० ॥

ज्येष्ठा कन्यानला नाम विभीषणसुता कपे ।
तया ममेदमाख्यातं मात्रा प्रहितया स्वयम् ॥ ११ ॥

आसंशेयं हरिश्रेष्ठ क्षिप्रं मां प्राप्स्यते पतिः ।
अन्तरात्मा हि मे शुद्धस् तस्मिंश्च बहवो गुणाः ॥ १२ ॥

उत्साहः पौरुषं सत्त्व मानृशंस्यं कृतज्ञता ।
विक्रमश्च प्रभावश्च सन्ति वानर राघवे ॥ १३ ॥

चतुर्दश सहस्राणि राक्षसानां जघान यः ।
जनस्थाने विना भ्रात्रा शत्रुः कस्तस्य नोद्विजेत् ॥ १४ ॥

न स शक्यस् तुलयितुं व्यसनैः पुरुषर्षभः ।
अहं तस्य प्रभावज्ञा शक्रस्येव पुलोमजा ॥ १५ ॥

शर जालांशुमान्छ् छूरः कपे राम दिवाकरः ।
शत्रु रक्षोमयं तोय मुपशोषं नयिष्यति ॥ १६ ॥

इति सञ्जल्पमानां तां रामार्थे शोक कर्शिताम् ।
अश्रु सम्पूर्ण नयना मुवाच वचनं कपिः ॥ १७ ॥

श्रुत्वैव तु वचो मह्यं क्षिप्र मेष्यति राघवः ।
चमूं प्रकर्षन् महतीं हर्यृक्ष गण संकुलाम् ॥ १८ ॥

अथवा मोचयिष्यामि त्वामद्यैव वरानने ।
अस्माद् दुःखा दुपारोह मम पृष्ठ मनिन्दिते ॥ १९ ॥

त्वां तु पृष्ठगतां कृत्वा सन्तरिष्यामि सागरम् ।
शक्तिरस्ति हि मे वोढुं लङ्कामपि स रावणाम् ॥ २० ॥

अहं प्रस्रवणस्थाय राघवा याद्य मैथिलि ।
प्रापयिष्यामि शक्राय हव्यं हुत मिवानलः ॥ २१ ॥

द्रक्ष्यस् यद्यैव वैदेहि राघवं सहल क्ष्मणम् ।
व्यवसाय समायुक्तं विष्णुं दैत्य वधे यथा ॥ २२ ॥

त्वद्दर्शन कृतोत्साह माश्रमस्थं महाबलम् ।
पुरन्दर मिवासीनं नाकराजस्य मूर्धनि ॥ २३ ॥

पृष्ठ मारोह मे देवि मा विकाङ्क्षस्व शोभने ।
योग मन्विच्छ रामेण शशाङ्केनेव रोहिणी ॥ २४ ॥

कथयन्तीव चन्द्रेण सूर्येण च महार्चिषा ।
मत्पृष्ठ मधिरुह्य त्वं तराकाश महार्णवौ ॥ २५ ॥

न हि मे सम्प्रयातस्य त्वामितो नयतोङ्गने ।
अनुगन्तुं गतिं शक्ताः सर्वे लङ्का निवासिनः ॥ २६ ॥

यथैवाह मिह प्राप्तस् तथैवाह मसंशयम् ।
यास्यामि पश्य वैदेहि त्वामुद्यम्य विहायसम् ॥ २७ ॥

मैथिली तु हरिश्रेष्ठाच् छ्रुत्वा वचन मद्भुतम् ।
हर्ष विस्मित सर्वाङ्गी हनुमन्त मथाब्रवीत् ॥ २८ ॥

हनुमन् दूर मध्वानं कथं मां वोढु मिच्छसि ।
तदेव खलु ते मन्ये कपित्वं हरि यूथप ॥ २९ ॥

कथं वाल्प शरीरस्त्वं मामितो नेतु मिच्छसि ।
सकाशं मानवेन्द्रस्य भर्तुर्मे प्लवगर्षभ ॥ ३० ॥

सीताया वचनं श्रुत्वा हनुमान् मारुतात्मजः ।
चिन्तयामास लक्ष्मीवान् नवं परिभवं कृतम् ॥ ३१ ॥

न मे जानाति सत्त्वं वा प्रभावं वाऽसितेक्षणा ।
तस्मात्पश्यतु वैदेही यद्रूपं मम कामतः ॥ ३२ ॥

इति सञ्चिन्त्य हनुमांस् तदा प्लवग सत्तमः ।
दर्शयामास वैदेह्याः स्वरूप मरिमर्दनः ॥ ३३ ॥

स तस्मात् पादपाद् धीमा नाप्लुत्य प्लवगर्षभः ।
ततो वर्धितु मारेभे सीता प्रत्यय कारणात् ॥ ३४ ॥

मेरु मन्दर सङ्काशो बभौ दीप्तानल प्रभः ।
अग्रतो व्यवतस्थे च सीताया वानरोत्तमः ॥ ३५ ॥

हरिः पर्वत सङ्काशस् ताम्र वक्त्रो महाबलः ।
वज्र दंष्ट्र नखो भीमो वैदेही मिद मब्रवीत् ॥ ३६ ॥

सपर्वत वनोद्देशां साट्ट प्राकार तोरणाम् ।
लङ्कामिमां सनाथां वा नयितुं शक्ति रस्ति मे ॥ ३७ ॥

तदवस्थाप्यतां बुद्धि रलं देवि विकाङ्क्षया ।
विशोकं कुरु वैदेहि राघवं सह लक्ष्मणम् ॥ ३८ ॥

तं दृष्ट्वा भीम सङ्काश मुवाच जनकात्मजा ।
पद्म पत्र विशालाक्षी मारुतस् यौरसं सुतम् ॥ ३९ ॥

तव सत्त्वं बलं चैव विजानामि महाकपे ।
वायोरिव गतिं चापि तेजश् चाग्ने रिवाद्भुतम् ॥ ४० ॥

प्राकृतोऽन्यः कथं चेमां भूमि मागन्तु मर्हति ।
उदधे रप्रमेयस्य पारं वानर पुङ्गव ॥ ४१ ॥

जानामि गमने शक्तिं नयने चापि ते मम ।
अवश्यं सम्प्रधार्याशु कार्य सिद्धिर् महात्मनः ॥ ४२ ॥

अयुक्तं तु कपिश्रेष्ठ मम गन्तुं त्वया सह ।
वायुवेग सवेगस्य वेगो मां मोहयेत्तव ॥ ४३ ॥

अहमाकाश मापन्ना ह्युपर् युपरि सागरम् ।
प्रपतेयं हि ते पृष्ठाद् भयाद् वेगेन गच्छतः ॥ ४४ ॥

पतिता सागरे चाहं तिमिनक्रझषा कुले ।
भवेयमाशु विवशा यादसा मन्न मुत्तमम् ॥ ४५ ॥

न च शक्ष्ये त्वया सार्धं गन्तुं शत्रु विनाशन ।
कलत्रवति सन्देहस् त्वय्यपि स्या दसंशयः ॥ ४६ ॥

ह्रियमाणां तु मां दृष्ट्वा राक्षसा भीमविक्रमाः ।
अनुगच्छेयु रादिष्टा रावणेन दुरात्मना ॥ ४७ ॥

तैस्त्वं परिवृतः शूरैः शूल मुद्गर पाणिभिः ।
भवेस्त्वं संशयं प्राप्तो मया वीर कलत्रवान् ॥ ४८ ॥

सायुधा बहवो व्योम्नि राक्षसास् त्वं निरायुधः ।
कथं शक्ष्यसि सम्यातुं मां चैव परिरक्षितुम् ॥ ४९ ॥

युध्यमानस्य रक्षोभिस् तव तैः क्रूरकर्मभिः ।
प्रपतेयं हि ते पृष्ठाद् भयार्ता कपि सत्तम ॥ ५० ॥

अथ रक्षांसि भीमानि महान्ति बलवन्ति च ।
कथञ्चित् साम्पराये त्वां जयेयुः कपिसत्तम ॥ ५१ ॥

अथवा युध्यमानस्य पतेयं विमुखस्य ते ।
पतितां च गृहीत्वा मां नयेयुः पाप राक्षसाः ॥ ५२ ॥

मां वा हरेयुस् त्वद्धस्ताद् विशसेयु रथापि वा ।
अव्यवस्थौ हि दृश्येते युद्धे जय पराजयौ ॥ ५३ ॥

अहं वाऽपि विपद्येयं रक्षोभि रभितर्जिता ।
त्वत् प्रयत्नो हरिश्रेष्ठ भवेन् निष्फल एव तु ॥ ५४ ॥

कामं त्वमसि पर्याप्तो निहन्तुं सर्व राक्षसान् ।
राघवस्य यशो हीयेत् त्वया शस्तैस्तु राक्षसैः ॥ ५५ ॥

अथवादाय रक्षांसि न्यसेयुः संवृते हि माम् ।
यत्र ते नाभि जानीयुर्ह रयो नापि राघवौ ॥ ५६ ॥

आरम्भस्तु मदर्थोऽयं ततस्तव निरर्थकः ।
त्वया हि सह रामस्य महा नागमने गुणः ॥ ५७ ॥

मयि जीवित मायत्तं राघवस्य महात्मनः ।
भ्रातॄणां च महाबाहो तव राजकुलस्य च ॥ ५८ ॥

तौ निराशौ मदर्थं तु शोक संताप कर्शितौ ।
सह सर्वर्क्ष हरिभिस् त्यक्ष्यतः प्राण सङ्ग्रहम् ॥ ५९ ॥

भर्तृ भक्तिं पुरस्कृत्य रामादन्यस्य वानर ।
न स्पृशामि शरीरं तु पुंसो वानर पुङ्गव ॥ ६० ॥

यदहं गात्र संस्पर्शं रावणस्य बलाद्गता ।
अनीशा किं करिष्यामि विनाथा विवशा सती ॥ ६१ ॥

यदि रामो दशग्रीव मिह हत्वा सबान्धवम् ।
मामितो गृह्य गच्छेत तत्तस्य सदृशं भवेत् ॥ ६२ ॥

श्रुता हि दृष्टाश्च मया पराक्रमा
महात्मनस्तस्य रणाव मर्दिनः ।
न देव गन्धर्व भुजङ्ग राक्षसा
भवन्ति रामेण समा हि संयुगे ॥ ६३ ॥

समीक्ष्य तं सम्यति चित्र कार्मुकं
महाबलं वासव तुल्य विक्रमम् ।
सलक्ष्मणं को विषहेत राघवं
हुताशनं दीप्त मिवानिलेरितम् ॥ ६४ ॥

स लक्ष्मणं राघव माजि मर्दनं
दिशा गजं मत्तमिव व्यवस्थितम् ।
सहेत को वानर मुख्य सम्युगे
युगान्त सूर्य प्रतिमं शरार्चिषम् ॥ ६५ ॥

स मे हरि श्रेष्ठ सलक्ष्मणं पतिं
सयूथपं क्षिप्र मिहोप पादय ।
चिराय रामं प्रति शोक कर्शितां
कुरुष्व मां वानर मुख्य हर्षिताम् ॥ ६६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे सप्तत्रिंशः सर्गः ॥ ३७ ॥